# Shri Namahshivayaragada

# શ્રીનમઃશિવાયરગડા

## Document Information

Text title : Shri Namahshivayaragada 02 26

File name : namaHshivAyaragaDA.itx

Category : shiva

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-26

Latest update : July 25, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

Shri Namahshivayaragada

# શ્રીનમઃશિવાયરગડા

શ્રીકરાય દન્તિચર્મચેલિને નમઃ શિવાય ।
ભાકરાય ભક્તલોકપાલિને નમઃ શિવાય ॥ ૧॥

કારણાદિકારણાત્મકાય તે નમઃ શિવાય ।
દારુણાસુરેન્દ્રગર્વદાય તે નમઃ શિવાય ॥ ૨॥

ભૂતનાયકાય લિમ્નભૂત તે નમઃ શિવાય ।
સૂતકાર્યકૃત્પયોજસૂત તે નમઃ શિવાય ॥ ૩॥

પાહિ માં મહેશ શર્વ ભર્ગ તે નમઃ શિવાય ।
વાહનાય માનવેદવર્ગ તે નમઃ શિવાય ॥ ૪॥

સામ્બ નીલકણ્ઠ દેવશરણ તે નમઃ શિવાય ।
સામ્બજનકવન્દ્યમાનચરણ તે નમઃ શિવાય ॥ ૫॥

કાશિનાથ વરદ રક્ષકાય તે નમઃ શિવાય ।
કાશમલ્લિકાપ્રકાશકાય તે નમઃ શિવાય ॥ ૬॥

રાજતાચલેન્દ્રમન્દિરાય તે નમઃ શિવાય ।
રાજખણ્ડભૃચ્છિખાન્તરાય તે નમઃ શિવાય ॥ ૭॥

મોક્ષદાયકાય ધન્ય (દૈવ)મુખ્ય તે નમઃ શિવાય ।
સાક્ષિમાત્રકાય (વિષ્ણુસખ્ય) તે નમઃ શિવાય ॥ ૮॥

ભૃઙ્ગિતાણ્ડવપ્રિયાય ભીમ તે નમઃ શિવાય ।
ગાઙ્ગવારિમસ્ત વીથિકાણ્ડ(વીતકામ) તે નમઃ શિવાય ॥ ૯॥

જાતરૂપભૂત રુદ્ર (ભૂધરેન્દ્ર) ચાપ તે નમઃ શિવાય ।
સૂતકાલહસ્તિવરદરૂપ તે નમઃ શિવાય ॥ ૧૦॥

ગિરિશ વારિવાહમાર્ગકેશ તે નમઃ શિવાય ।
ગરલકણ્ઠ સત્ય ચિત્પ્રકાશ તે નમઃ શિવાય ॥ ૧૧॥

અમ્બરામ્બરાય ભુજગહાર તે નમઃ શિવાય ।
અમ્બુજાક્ષધીરતાપ્રહાર તે નમઃ શિવાય ॥ ૧૨॥

પઙ્કજોદરાર્ચનાર્હપાદ તે નમઃ શિવાય ।
કિઙ્કિણીકૃતપ્રદાનકાદ તે નમઃ શિવાય ॥ ૧૩॥

સુરસરિત્તરઙ્ગસઙ્ગિજૂટ તે નમઃ શિવાય ।
ગુરુશિરોધિસંસ્થ કાલકૂટ તે નમઃ શિવાય ॥ ૧૪॥

દક્ષસવનહરણકાર્યદક્ષ તે નમઃ શિવાય ।
પક્ષિવાહનેત્રગર્ભપક્ષ તે નમઃ શિવાય ॥ ૧૫॥

વારણાસુરારિવસ્ત્રશર્મ તે નમઃ શિવાય ।
સારઘોરતરહરાસ્ત્રશસ્ત્ર તે નમઃ શિવાય ॥ ૧૬॥

કરસરોરુહપ્રભાસકમલ તે નમઃ શિવાય ।
ગરુડવાહનેત્રપાદકમલ તે નમઃ શિવાય ॥ ૧૭॥

હરિણભાનુલપનમન્દહાસ તે નમઃ શિવાય ।
વરમુનીન્દ્રહૃદયપદ્મવાસ તે નમઃ શિવાય ॥ ૧૮॥

દારુકાટવીવિટપ્રદાર (પ્રચાર) તે નમઃ શિવાય ।
તારકેશ્વરાર્ધચન્દ્રધાર તે નમઃ શિવાય ॥ ૧૯॥

આજવન્ધ્યવદનદાવહારિણે નમઃ શિવાય ।
કાજલાભિષેકસૌખ્યકારિણે નમઃ શિવાય (?) ॥ ૨૦॥

દાસદોષદુઃખગહનદહન તે નમઃ શિવાય ।
વાસદુદર(વાસવાદિ)લોકજાલવહન તે નમઃ શિવાય ॥ ૨૧॥

કઞ્જભવકપાલમાલિકાય તે નમઃ શિવાય ।
કઞ્જભવભવાદિગીતકાય તે નમઃ શિવાય ॥ ૨૨॥

રતિરતીશકોટિસુન્દરાય તે નમઃ શિવાય ।
નતસુરારિભિદ્વિરિઞ્ચનાય તે નમઃ શિવાય ॥ ૨૩॥

નિરતકૃતનિશામુખોરુનૃત્ય તે નમઃ શિવાય ।
ધરધરીગુહાસ્તદુષ્ટદૈત્ય તે નમઃ શિવાય ॥ ૨૪॥

હર શિવાભવાન્ધકાપહાર તે નમઃ શિવાય ।
દુરિતજનનમરણદુઃખદૂર તે નમઃ શિવાય ॥ ૨૫॥

શૈવચિત્પુરસ્થપારિજાત તે નમઃ શિવાય ।
સાવધાનતાદિતેયજાત તે નમઃ શિવાય ॥ ૨૬॥

હંસકોટિકોટિસુપ્રભાઙ્ગ તે નમઃ શિવાય ।
કંસવૈરિસેવ્યમસ્તકાઙ્ગ તે નમઃ શિવાય ॥ ૨૭॥

શ્રીદમિત્રપુરસુરારિશિક્ષ તે નમઃ શિવાય ।
સાધકા(સાદરા)મૃતસ્ફુરત્કટાક્ષ તે નમઃ શિવાય ॥ ૨૮॥

દિનકરેન્દુવહ્નિમુખ્યદેહ તે નમઃ શિવાય ।
વનજભવમુખાદિવૃષભવાહ તે નમઃ શિવાય ॥ ૨૯॥

નીરજાપ્તવહ્નિસોમનેત્ર તે નમઃ શિવાય ।
નીરદોપમાનકૃત્તિનેત્ર તે નમઃ શિવાય ॥ ૩૦॥

શ્વેતભીતભીતિમેઘવાત તે નમઃ શિવાય ।
ભૂતપઞ્ચકાદિહેતુભૂત તે નમઃ શિવાય ॥ ૩૧॥

શીતપાતચન્દ્રિકાવદાત તે નમઃ શિવાય ।
શાતશૂલહસ્તવારિજાત તે નમઃ શિવાય ॥ ૩૨॥

ભૂરિકલુષકાણ્ડવાતપોત તે નમઃ શિવાય ।
સ્મેરમુખગણાદિસુતસમેત તે નમઃ શિવાય ॥ ૩૩॥

દુરિતહરણ પરમહંસરૂપ તે નમઃ શિવાય ।
તરુણહરિણલાઞ્છનાવતંસ તે નમઃ શિવાય ॥ ૩૪॥

પાર્વતીનિવાસવામભાગ તે નમઃ શિવાય ।
પૂર્વનાથદત્તયોગ્યભોગ્ય તે નમઃ શિવાય ॥ ૩૫॥

ભાવસમ્ભવાવલેપભઙ્ગ તે નમઃ શિવાય ।
સાવધાનહૃદયહૃદયસઙ્ગ તે નમઃ શિવાય ॥ ૩૬॥

સુજનહૃદયવારિજાતસૂર તે નમઃ શિવાય ।
ભજનશીલભવસમુદ્રપાર તે નમઃ શિવાય ॥ ૩૭॥

ભલ્લહાભિધાનદારબાલ તે નમઃ શિવાય ।
સલ્લલિતકપિત્થકાન્તિજાલ તે નમઃ શિવાય ॥ ૩૮॥

વરકરારવિન્દહરિણ પાક (વાક) તે નમઃ શિવાય ।

સુરગિરીન્દ્રનિલય વીતશોક તે નમઃ શિવાય ॥ ૩૯॥

સુરુચિરાદ્રિજામનોઽર્ધચોર તે નમઃ શિવાય ।
પરિહૃતાનઘાલિભેદભાર તે નમઃ શિવાય ॥ ૪૦॥

કમ્બલાશ્વતરવિચિત્રગાન તે નમઃ શિવાય ।
સામ્બ જૂટબન્ધ જલવિહાર તે નમઃ શિવાય ॥ ૪૧॥

અભયવરદટઙ્કપરશુહસ્ત તે નમઃ શિવાય ।
સભયપૂર્વદેવતાપ્રશસ્ત તે નમઃ શિવાય ॥ ૪૨॥

પટુવિલાસરજતકાણ્ડભાણ્ડ તે નમઃ શિવાય ।
કટિવિરાજમાનચર્મખણ્ડ તે નમઃ શિવાય ॥ ૪૩॥

ચટુલમસ્તઘટિતબાલચન્દ્ર તે નમઃ શિવાય ।
ચટુલભુવનકીર્તિસાન્દ્રચન્દ્ર તે નમઃ શિવાય ॥ ૪૪॥

શમદમાદિયુક્તભક્તસક્ત તે નમઃ શિવાય ।
પ્રમથવચનરચનસાનુરક્ત તે નમઃ શિવાય ॥ ૪૫॥

ઉરુતરાશ્વભાવગતમહોક્ષ તે નમઃ શિવાય ।
પરિતભસ્મપૂર્ણ ગરલભક્ષ તે નમઃ શિવાય ॥ ૪૬॥

અમ્બુરાશિમેખલાઞ્ચિતાઙ્ગ તે નમઃ શિવાય ।
શમ્બહસ્તસુરવરપ્રસઙ્ગ તે નમઃ શિવાય ॥ ૪૭॥

કપટનાટકપ્રબોધકાય તે નમઃ શિવાય ।
તપનમણ્ડલાન્તરસ્થિતાય તે નમઃ શિવાય ॥ ૪૮॥

અજગવાખ્યચાપસઙ્ગ્રહાય તે નમઃ શિવાય ।
કજભવાદિસેવ્યપાદુકાય તે નમઃ શિવાય ॥ ૪૯॥

સકલનિષ્કલામૃતદ્રુસાલ તે નમઃ શિવાય ।
પ્રકટવીતિહોત્રનીલભાલ તે નમઃ શિવાય ॥ ૫૦॥

નલિનબન્ધુકદનભઞ્જનાય તે નમઃ શિવાય ।
કલિતવીરભદ્રનામકાય તે નમઃ શિવાય ॥ ૫૧॥

અખિલજનભયઙ્કરાટ્ટહાસ તે નમઃ શિવાય ।
અખિલસેવકૌઘસુખદહાસ તે નમઃ શિવાય ॥ ૫૨॥

લયવિલૂનપવનમિત્રરસન તે નમઃ શિવાય ।
લયભયામૃતામરાસ્મરસન તે નમઃ શિવાય ॥ ૫૩॥

નરહરિપ્રકૃષ્ટગર્વહરણ તે નમઃ શિવાય ।
શરભસાલુવસ્વરૂપભરણ તે નમઃ શિવાય ॥ ૫૪॥

શ્રીપઞ્ચાક્ષરમન્ત્રમષ્ટશતસઙ્ખ્યાકસ્તવં સર્વદા
ये શ ृણ્વન્તિ પઠન્તિ પાવનજનાસ્તેષાં તુ રોગૌષધમ્ ।
વેદાન્તોદ્ભવચિદ્વિશિષ્ટ વચસામપ્યૂહતાં દુર્લભં (મનસામપ્યૂહ્યતાં)
વિન્દન્તીન્દુકલાધરં ચ સુતરાં સાયુજ્યમુક્તિં મુદા ॥ ૫૫॥

॥ ઇતિ શ્રીનમશ્શિવાયરગડા સમ્પૂર્ણા ॥

Proofread by Aruna Narayanan

*Shri Namahshivayaragada*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*